# shANDilya bhakti sUtram

# શાણ્ડિલ્ય ભક્તિ સૂત્રમ્

## Document Information

Text title : shANDilya bhaktisUtram

File name : shandilya-bs.itx

Category : major_works

Location : doc_z_misc_major_works

Transliterated by : Anshuman Pandey pandey at umich.edu

Proofread by : Anshuman Pandey pandey at umich.edu

Latest update : August 14, 1996

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

shANDilya bhakti sUtram

# શાણ્ડિલ્ય ભક્તિ સૂત્રમ્

પ્રથમોઽધ્યાયઃ

પ્રથમમાહ્નિકમ્

૦૧ ૦૧ ૦૦૧ અથાતો ભક્તિજિજ્ઞાસા ॥ ૧॥

૦૧ ૦૧ ૦૦૨ સા પરાઽનુરક્તિરીશ્વરે ॥ ૨॥

૦૧ ૦૧ ૦૦૩ તત્સંસ્થસ્યામૃતત્વોપદેશાત્ ॥ ૩॥

૦૧ ૦૧ ૦૦૪ જ્ઞાનમિતિ ચેન્ન દ્વિષતોઽપિ જ્ઞાનસ્ય તદસંસ્થિતેઃ ॥ ૪॥

૦૧ ૦૧ ૦૦૫ તયોપક્ષયાચ્ચ ॥ ૫॥

૦૧ ૦૧ ૦૦૬ દ્વેષપ્રતિપક્ષભાવાદ્રસશબ્દાચ્ચ રાગઃ ॥ ૬॥

૦૧ ૦૧ ૦૦૭ ન ક્રિયા કૃત્યનપેક્ષણાજ્જ્ઞાનવત્ ॥ ૭॥

૦૧ ૦૧ ૦૦૮ અત એવ ફલાનન્ત્યમ્ ॥ ૮॥

૦૧ ૦૧ ૦૦૯ તદ્વતઃ પ્રપત્તિશબ્દાચ્ચ ન જ્ઞાનમિતરપ્રપત્તિવત્ ॥ ૯॥

દ્વિતીયમાહ્નિકમ્

૦૧ ૦૨ ૦૦૧ સા સુખ્યેતરાપેક્ષિતત્વાત્ ॥ ૧૦॥

૦૧ ૦૨ ૦૦૨ પ્રકરણાચ્ચ ॥ ૧૧॥

૦૧ ૦૨ ૦૦૩ દર્શનફલમિતિ ચેન્ન તેન વ્યવધાનાત્ ॥ ૧૨॥

૦૧ ૦૨ ૦૦૩ દૃષ્ટત્વાચ્ચ ॥ ૧૩॥

૦૧ ૦૨ ૦૦૪ અત એવ તદભાવાદ્વલ્લવીનામ્ ॥ ૧૪॥

૦૧ ૦૨ ૦૦૫ ભક્ત્યા જાનાતીતિ ચેન્નાભિજ્ઞપ્ત્યા સાહાય્યાત્ ॥ ૧૫॥

૦૧ ૦૨ ૦૦૬ પ્રાગુક્તં ચ ॥ ૧૬॥

૦૧ ૦૨ ૦૦૭ એતેન વિકલ્પોઽપિ પ્રત્યુક્તઃ ॥ ૧૭॥

૦૧ ૦૨ ૦૦૮ દેવભક્તિરિતરસ્મિન્ સાહચર્યાત્ ॥ ૧૮॥

૦૧ ૦૨ ૦૦૯ યોગસ્તૂભયાર્થમપેક્ષણાત્ પ્રયાજવત્ ॥ ૧૯॥

૦૧ ૦૨ ૦૧૦ ગૌણ્યા તુ સમાધિસિદ્ધિઃ ॥ ૨૦॥

૦૧ ૦૨ ૦૧૧ હેયા રાગત્વાદિતિ ચેન્નોત્તમાસ્પદત્વાત્ સઙ્ગવત્ ॥ ૨૧॥

૦૧ ૦૨ ૦૧૨ તદેવ કર્મિજ્ઞાનિયોગિભ્ય આધિક્યશબ્દાત્ ॥ ૨૨॥

૦૧ ૦૨ ૦૧૩ પ્રશ્નનિરૂપણાભ્યામાધિક્યસિદ્ધેઃ ॥ ૨૩॥

૦૧ ૦૨ ૦૧૪ નૈવ શ્રદ્ધા તુ સાધારણ્યાત્ ॥ ૨૪॥

૦૧ ૦૨ ૦૧૫ તસ્યાં તત્ત્વે ચાનવસ્થાનાત્ ॥ ૨૫॥

૦૧ ૦૨ ૦૧૬ બ્રહ્મકાણ્ડં તુ ભક્તૌ તસ્યાનુજ્ઞાનાય સામાન્યાત્ ॥ ૨૬॥

સમાપ્તશ્ચ પ્રથમોઽધ્યાયઃ ॥ ૧॥

દ્વિતીયોઽધ્યાયઃ

પ્રથમમાહ્નિકમ્

૦૨ ૦૧ ૦૦૧ બુદ્ધિહેતુપ્રવૃત્તિરાવિશુદ્ધેરવઘાતવત્ ॥ ૨૭॥

૦૨ ૦૧ ૦૦૨ તદઙ્ગાનાં ચ ॥ ૨૮॥

૦૨ ૦૧ ૦૦૩ તામૈશ્વર્યપરાં કાશ્યપઃ પરત્વાત્ ॥ ૨૯॥

૦૨ ૦૧ ૦૦૪ આત્મૈકપરાં બાદરાયણઃ ॥ ૩૦॥

૦૨ ૦૧ ૦૦૫ ઉભયપરાં શાણ્ડિલ્યઃ શબ્દોપપત્તિભ્યામ્ ॥ ૩૧॥

૦૨ ૦૧ ૦૦૬ વૈષમ્યાદસિદ્ધમિતિ ચેન્નાભિજ્ઞાનવદવૈશિષ્ટ્યાત્ ॥ ૩૨॥

૦૨ ૦૧ ૦૦૭ ન ચ ક્લિષ્ટઃ પરઃ સ્યાદનન્તરં વિશેષાત્ ॥ ૩૩॥

૦૨ ૦૧ ૦૦૮ ઐશ્વર્યં તથેતિ ચેન્ન સ્વાભાવ્યાત્ ॥ ૩૪॥

૦૨ ૦૧ ૦૦૯ અપ્રતિષિદ્ધં પરૈશ્વર્યં તદ્ભાવાચ્ચ નૈવમિતરેષામ્ ॥ ૩૫॥

૦૨ ૦૧ ૦૧૦ સર્વાનૃતે કિમિતિ ચેન્નૈવમ્બુદ્ધ્યાનન્ત્યાત્ ॥ ૩૬॥

૦૨ ૦૧ ૦૧૧ પ્રકૃત્યન્તરાલાદવૈકાર્યં ચિત્સત્ત્વેનાનુવર્તમાનાત્ ॥ ૩૭॥

૦૨ ૦૧ ૦૧૨ તત્પ્રતિષ્ઠા ગૃહપીઠવત્ ॥ ૩૮॥

૦૨ ૦૧ ૦૧૩ મિથોઽપેક્ષણાદુભયમ્ ॥ ૩૯॥

૦૨ ૦૧ ૦૧૪ ચેત્યાચિતોર્ન તૃતીયમ્ ॥ ૪૦॥

૦૨ ૦૧ ૦૧૫ યુક્તૌ ચ સમ્પરાયાત્ ॥ ૪૧॥

૦૨ ૦૧ ૦૧૬ શક્તિત્વાન્નાનૃતં વેદ્યમ્ ॥ ૪૨॥

૦૨ ૦૧ ૦૧૭ તત્પરિશુદ્ધિશ્ચ ગમ્યા લોકવલ્લિઙ્ગેભ્યઃ ॥ ૪૩॥

૦૨ ૦૧ ૦૧૮ સમ્માનબહુમાનપ્રીતિવિરહેતરવિચિકિત્સામહિમખ્યાતિતદર્થ-
પ્રાણસ્થાનતદીયતાસર્વતદ્ભા-
વાપ્રાતિકૂલ્યાદીનિ ચ સ્મરણેભ્યો વાહુલ્યાત્ ॥ ૪૪॥

૦૨ ૦૧ ૦૧૯ દ્વેષાદયસ્તુ નૈવમ્ ॥ ૪૫॥

૦૨ ૦૧ ૦૨૦ તદ્વાક્યશેષાત્ પ્રાદુર્ભાવેષ્વપિ સા ॥ ૪૬॥

૦૨ ૦૧ ૦૨૧ જન્મકર્મવિદશ્ચાજન્મશબ્દાત્ ॥ ૪૭॥

૦૨ ૦૧ ૦૨૨ તચ્ચ દિવ્યં સ્વશક્તિમાત્રોદ્ભવાત્ ॥ ૪૮॥

૦૨ ૦૧ ૦૨૩ મુખ્યં તસ્ય હિ કારુણ્યમ્ ॥ ૪૯॥

૦૨ ૦૧ ૦૨૪ પ્રાણિત્વાન્ન વિભૂતિષુ ॥ ૫૦॥

૦૨ ૦૧ ૦૨૫ દ્યૂતરાજસેવયોઃ પ્રતિષેધાચ્ચ ॥ ૫૧॥

૦૨ ૦૧ ૦૨૬ વાસુદેવેઽપીતિ ચેન્નાકારમાત્રત્વાત્ ॥ ૫૨॥

૦૨ ૦૧ ૦૨૭ પ્રત્યભિજ્ઞાનાચ્ચ ॥ ૫૩॥

૦૨ ૦૧ ૦૨૮ વૃષ્ણિષુ શ્રૈષ્ઠ્યેન તત્ ॥ ૫૪॥

૦૨ ૦૧ ૦૨૯ એવં પ્રસિદ્ધેષુ ચ ॥ ૫૫॥

દ્વિતીયમાહ્નિકમ્

૦૨ ૦૨ ૦૦૧ ભક્ત્યા ભજનોપસંહારાદ્ગૌણ્યા પરાયૈ તદ્ધેતુત્વાત્ ॥ ૫૬॥

૦૨ ૦૨ ૦૦૨ રાગાર્થપ્રકીર્તિસાહચર્યાચ્ચેતરેષામ્ ॥ ૫૭॥

૦૨ ૦૨ ૦૦૩ અન્તરાલે તુ શેષાઃ સ્યુરુપાસ્યાદૌ ચ કાણ્ડત્વાત્ ॥ ૫૮॥

૦૨ ૦૨ ૦૦૪ તાભ્યઃ પાવિત્ર્યમુપક્રમાત્ ॥ ૫૯॥

૦૨ ૦૨ ૦૦૫ તાસુ પ્રધાનયોગાત્ ફલાધિક્યમેકે ॥ ૬૦॥

૦૨ ૦૨ ૦૦૬ નામ્નેતિ જૈમિનિઃ સમ્ભવાત્ ॥ ૬૧॥

૦૨ ૦૨ ૦૦૭ અત્રાઙ્ગપ્રયોગાનાં યથાકાલસમ્ભવો ગૃહાદિવત્ ॥ ૬૨॥

૦૨ ૦૨ ૦૦૮ ઈશ્વરતુષ્ટેરેકોઽપિ બલી ॥ ૬૩॥

૦૨ ૦૨ ૦૦૯ અબન્ધોઽર્પણસ્ય મુખમ્ ॥ ૬૪॥

૦૨ ૦૨ ૦૧૦ ધ્યાનનિયમસ્તુ દૃષ્ટસૌકર્યાત્ ॥ ૬૫॥

૦૨ ૦૨ ૦૧૧ તદ્યજિઃ પૂજાયામિતરેષાં નૈવમ્ ॥ ૬૬॥

૦૨ ૦૨ ૦૧૨ પાદોદકં તુ પાદ્યમવ્યાપ્તેઃ ॥ ૬૭॥

૦૨ ૦૨ ૦૧૩ સ્વયમર્પિતં ગ્રાહ્યમવિશેષાત્ ॥ ૬૮॥

૦૨ ૦૨ ૦૧૪ નિમિત્તગુણાવ્યપેક્ષણાદપરાધેષુ વ્યવસ્થા ॥ ૬૯॥

૦૨ ૦૨ ૦૧૫ પત્રાદેર્દાનમન્યથા હિ વૈશિષ્ટ્યમ્ ॥ ૭૦॥

૦૨ ૦૨ ૦૧૬ સુકૃતજત્વાત્ પરહેતુભાવાચ્ચ ક્રિયાસુ શ્રેયસ્યઃ ॥ ૭૧॥

૦૨ ૦૨ ૦૧૭ ગૌણં ત્રૈવિધ્યમિતરેણ સ્તુત્યર્થત્વાત્ સાહચર્યમ્ ॥ ૭૨॥

૦૨ ૦૨ ૦૧૮ બહિરન્તસ્થમુભયમવેષ્ટિસવવત્ ॥ ૭૩॥

૦૨ ૦૨ ૦૧૯ સ્મૃતિકીર્ત્યોઃ કથાદેશ્ચાર્તૌ પ્રાયશ્ચિત્તભાવાત્ ॥ ૭૪॥

૦૨ ૦૨ ૦૨૦ ભૂયસામનનુષ્ઠિતિરિતિ ચેદાપ્રયાણમુપસંહારાન્મહત્સ્વપિ ॥ ૭૫॥

૦૨ ૦૨ ૦૨૧ લઘ્વપિ ભક્તાધિકારે મહત્ક્ષેપકમપરસર્વહાનાત્ ॥ ૭૬॥

૦૨ ૦૨ ૦૨૨ તત્સ્થાનત્વાદનન્યધર્મઃ ખલેવાલીવત્ ॥ ૭૭॥

૦૨ ૦૨ ૦૨૩ આનિન્દ્યયોન્યધિક્રિયતે પારમ્પર્યાત્ સામાન્યવત્ ॥ ૭૮॥

૦૨ ૦૨ ૦૨૪ અતો હ્યવિપક્વભાવાનામપિ તલ્લોકે ॥ ૭૯॥

૦૨ ૦૨ ૦૨૫ ક્રમૈકગત્યુપપત્તેસ્તુ ॥ ૮૦॥

૦૨ ૦૨ ૦૨૬ અત્ક્રાન્તિસ્મૃતિવાક્યશેષાચ્ચ ॥ ૮૧॥

૦૨ ૦૨ ૦૨૭ મહાપાતકિનાં ત્વાર્તૌ ॥ ૮૨॥

૦૨ ૦૨ ૦૨૮ સૈકાન્તભાવો ગીતાર્થપ્રત્યભિજ્ઞાનાત્ ॥ ૮૩॥

૦૨ ૦૨ ૦૨૯ પરાં કૃત્વૈવ સર્વેષાં તથા હ્યાહ ॥ ૮૪॥

સમાપ્તશ્ચ દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

તૃતીયોઽધ્યાયઃ

પ્રથમમાહ્નિકમ્

03 ૦૧ ૦૦૧ ભજનીયેનાદ્વિતીયમિદં કૃત્સ્નસ્ય તત્સ્વરૂપત્વાત્ ॥ ૮૫॥

03 ૦૧ ૦૦૨ તચ્છક્તિર્માયા જડસામાન્યાત્ ॥ ૮૬॥

03 ૦૧ ૦૦3 વ્યાપકત્વાદ્વ્યાપ્યાનામ્ ॥ ૮૭॥

03 ૦૧ ૦૦૪ ન પ્રાણિબુદ્ધિભ્યોઽસમ્ભવાત્ ॥ ૮૮॥

03 ૦૧ ૦૦૫ નિર્માયોચ્ચાવચં શ્રુતીશ્ચ નિર્મિમીતે પિતૃવત્ ॥ ૮૯॥

03 ૦૧ ૦૦૬ મિશ્રોપદેશાન્નેતિ ચેન્ન સ્વલ્પત્વાત્ ॥ ૯૦॥

03 ૦૧ ૦૦૭ ફલમસ્માદ્બાદરાયણો દૃષ્ટત્વાત્ ॥ ૯૧॥

03 ૦૧ ૦૦૮ વ્યુત્ક્રમાદપ્યયસ્તથા દૃષ્ટમ્ ॥ ૯૨॥

દ્વિતીયમાહ્નિકમ્

03 ૦૨ ૦૦૧ તદૈક્યં નાનાત્વૈકત્વમુપાધિયોગહાનાદાદિત્યવત્ ॥ ૯3॥

03 ૦૨ ૦૦૨ પૃથગિતિ ચેન્ન પરેણાસમ્બન્ધાત્ પ્રકાશાનામ્ ॥ ૯૪॥

03 ૦૨ ૦૦3 ન વિકારિણસ્તુ કરણવિકારાત્ ॥ ૯૫॥

03 ૦૨ ૦૦૪ અનન્યભક્ત્યા તદ્બુદ્ધિર્બુદ્ધિલયાદત્યન્તમ્ ॥ ૯૬॥

03 ૦૨ ૦૦૫ આયુશ્ચિરમિતરેષાં તુ હાનિરનાસ્પદત્વાત્ ॥ ૯૭॥

03 ૦૨ ૦૦૬ સંસૃતિરેષામભક્તિઃ સ્યાન્નાજ્ઞાનાત્ કારણાસિદ્ધેઃ ॥ ૯૮॥

03 ૦૨ ૦૦૭ ત્રીણ્યેષાં નેત્રાણિ શબ્દલિઙ્ગાક્ષભેદાદ્રુદ્રવત્ ॥ ૯૯॥

03 ૦૨ ૦૦૮ આવિસ્તિરોભાવા વિકારાઃ સ્યુઃ ક્રિયાફલસંયોગાત્ ॥ ૧૦૦॥

સમાપ્તશ્ચ તૃતીયોઽધ્યાયઃ ॥ 3॥

ઇતિ શ્રીશાણ્ડિલ્યમહર્ષિપ્રણીતભક્તિસૂત્રમ્

ENcoded and proofread by Anshuman Pandey pandey at umich.edu

*shANDilya bhakti sUtram*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*